सर्व्वेषां प्रवृत्तावेकस्यैवेश्वरत्वं नापरेषां सदःपरिषदामिव, कार्य्योत्पत्त्यनुरोधे प्रत्येकमनीश्वरत्वम् । तदेवं कार्यविशेषेण सिद्धस्य कर्त्तृविशेषस्य सर्व्वज्ञत्वान्न तत्र चिद्वस्तुनि विशेषानुपलम्भः । अतो न तन्निबन्धनं मिथ्याज्ञानं मिथ्याज्ञानाभावाच्च न तन्मूलौ रागद्वेषौ तयोरभावान्न तत्पूर्व्विका प्रवृत्तिः प्रवृत्त्यभावे च न तत्साध्यौ धर्म्माधर्म्मौ तयोरभावात्तज्जयोरपि सुखदुःखयोरभावः सर्व्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नासाते इत्यष्टगुणाधिकरणं भगवानीश्वर इति केचित् । अन्ये तु बुद्धिरेव तस्याव्याहता क्रियाशक्तिरित्येवं वदन्त इच्छाप्रयत्नावनङ्गीकुर्व्वाणाः षड्गुणाधिकरणमयमित्याहुः । स किं बद्धो मुक्तो वा न तावत् बद्धो बन्धनसमाक्षिप्तस्य बन्धनहेतोः क्लेशादेरसम्भवात् मुक्तोऽपि न भवति बन्धविच्छेदपर्य्यायत्वान्मुक्तेः । नित्यमुक्तः स्यात् यदाह तत्रभवान् पातञ्जलिः "क्लेशजन्मकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर" इति ।

अनुमानचिन्तामणौ ईश्वरवादो यथा

"एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः क्षित्यादौ कार्य्यत्वेन घटवत् सकर्त्तृकत्वानुमानात् । ननु क्षित्यादि प्रत्येकं न पक्षः तस्य स्वशब्देनाभिधातुमशक्यत्वात् नापि मिलितम् एकरूपाभावात् अत एव सकर्त्तृत्वविचारारम्भकसंशयविषयः, तथा विवादविषयो वा न पक्षः एकरूपाभावेन तयोस्तावत् ग्रहीतुमशक्यत्वात् वादिनोर्निश्चितत्वेन संशयाभावात् । न च वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशयः । अनुमानाभ्यां तस्य संशयः मध्यस्थप्रश्नानन्तरञ्चानुमानमिति परस्पराश्रयात् घटेऽपि कदाचित् तयोः सम्भवात्, प्रत्येकसंशये विवादाभासत्वेनानुमानेऽर्थान्तरतापत्तेश्च । न च शरीरापेक्षेण कर्त्रा यन्न कृतं शरीराजन्यं जन्यं वा पक्षः जन्यात्मविशेषगुणशब्दफूत्कारसर्गाद्यकालीनवेदघटादिलिप्यादि संप्रदायानामीश्वरमात्रकर्त्तृकाणामसंग्रहात् असिद्धेश्च अदृष्टद्वारा शरीरिणोऽपि क्षित्यादिकर्त्तृत्वात् । नापि जन्यकृत्यजन्यं जन्यम् उभयसिद्धकृतिजन्यान्यजन्यं वा पक्षः क्षित्यादीनामदृष्टद्वारा जन्यकृतिजन्यत्वात् । नाप्यदृष्टजनककृत्यजन्यं जन्यं कृतिसाक्षादजन्यं वा पक्षः ईश्वरकृतेरदृष्टजनकत्वेन क्षितौ तदभावात् घटादावप्येवं पक्षत्वेनांशतः सिद्धसाधनात् । न च क्षितिरेव पक्षः, अङ्कुरेण सन्दिग्धानैकान्तात् । न च निश्चितविपक्षे हेतुसन्देहात् स इति वाच्यं हेतौ साध्याभाववद्धर्मित्वसंशयस्य दूषकत्वात् स च साध्याभाववति हेतुसन्देहात् हेतुमति साध्याभावसन्देहाद्वा उभयथापि दोषः । न चैवं पक्षेऽपि तत्, अनुमानमात्रोच्छेदकत्वेन तदितरत्र तस्य दूषकत्वात् । अङ्कुरे हेतोरनिश्चयेन सन्दिग्धानैकान्तिकं तन्निश्चयेन साध्यसन्देहवति साध्यानुमितिरेव पक्षवत् सामग्रीसत्त्वात् । अत एवाङ्कुरः पक्षसम इति चेन्न तस्यापक्षत्वेन हेतोः पक्षधर्मताविरहेण स्थापनानुमानाविषयत्वात् । तदा तस्यापि पक्षत्वे प्रतिज्ञानुपपत्तिः । अत्र मानान्तराधीनतत्साध्यानुमित्यनन्तरञ्च पक्षेऽनुमितावितरेतराश्रयान्नैकमप्यनुमानम् । तत्रापि क्षित्या सन्दिग्धानैकान्तात्, क्षितेर्विवादविषयत्वेऽङ्कुरे साध्यमाने अर्थान्तराच्च । किञ्चैवमेकैकोपादानाभिज्ञसिद्धावपि नेश्वरसिद्धिः नापि सर्गाद्यकालीनं द्व्यणुकं पक्षः परम्प्रति सर्गाद्यसिद्धेः इति" पक्षाक्षेपः । "किञ्च सकर्त्तृकत्वं ? न तावत् कृतिमत्सहभावः कृतिमज्जन्यत्वं वा अस्मदादिना सिद्धसाधनात् । उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वं तदिति चेत् उपादानगोचरत्वं यदि यत्किञ्चिदुपादानगोचरत्वं तदा अस्मदादिनाऽर्थान्तरत्वं ज्ञानादीनामपि जनकत्वं विवक्षितं न च घटोपादानगोचरज्ञानादीनां क्षितिजनकत्वं सम्भवति व्यभिचारादिति चेन्न क्षितिजनकादृष्टजनकज्ञानादीनाम् उपादानविषयनियमेनादृष्टद्वारा तैरेव सिद्धसाधनात् । न च साक्षात्तज्जन्यत्वं विवक्षितं तद्धि न कृतिजन्याजन्यत्वे सति कृतिजन्यत्वं स्वजनककृत्यव्यवहितोत्तरक्षणवर्त्तित्वं वा घटदृष्टान्तस्य साध्यविकलत्वापत्तेः घटादौ कुलालादिकर्त्तृकत्वाभावप्रसङ्गाच्च । न च शरीरक्रियादृष्टान्त इति वाच्यं घटेनानैकान्तात् चेष्टात्वस्योपाधित्वाच्च । नापि क्षित्याद्युपादानगोचरत्वं विवक्षितं अप्रसिद्धेः न चोपादानशब्दस्य सम्बन्धिशब्दत्वेन घटक्षित्यादिसमभिव्याहारे तत्तदुपादानगोचरत्वं चैत्रो मातृभक्तो मैत्रवदिति वाच्यं शाब्दे हि बोधे तथा न चात्र शब्दः प्रमाणं वादिनोऽनाप्तत्वात् । अनुमाने त्वनुगतेन व्यापकत्वग्रहे तेन रूपेण व्यापकसिद्धिः तच्चोपादानत्वमेवेति कथं नार्थान्तरम् । किञ्चैवं घटादावपि तदुपादानत्वेनैवोपस्थित्यासामान्येन रूपेण कृत्याद्यनुपस्थितेर्व्याप्तिरेव न गृह्येत । अपि च सामान्यलक्षणया ज्ञानलक्षणया योगजधर्मरूपया वा प्रत्यासत्त्योपादानगोचरापरोक्षज्ञानतज्जन्यचिकीर्षाकृतिमताऽस्मदादिना सिद्धसाधनम् तेषां क्षित्यव्यवहितपूर्व्वसमयासत्त्वेऽपि तद्वतः सत्त्वात् अदृष्टद्वारा